[1]श्रीवल्लभाचार्यमतानुवर्ती तद्दासदासः पुरुषोत्तमाख्यः ॥
क्षिप्तं खलैर्वर्त्मनि वैष्णवानां पंकं हरन्वर्त्मसुखं चकार ॥ ५ ॥

References.—

(1) Mss.— A–Aufrecht's Catalogus Catalogorum :—
I, 360[a].

---

1. In the Ms. this verse is indicated as an addition to the text after the 4th verse by the sign ^ after that verse.

प्रेमाब्धिरसकणिका Premābdhirasakaṇikā

No. 524 No. $\frac{724}{1887-91}$

Size.— 13 in. by $5\frac{3}{8}$ in.

Extent.— 156 leaves ; 12 lines to a page ; 42 letters to a line.

Description.— Tough country paper; Devanāgarī Characters; handwriting medium, bold, uniform. Borders ruled with double black lines. Foll. have become soft near margins, and due to crumbling off defaced the text. All foll. discoloured in parts. Red ink used for key-words, verse-numbers and punctuation-marks on first few foll. White pigment used for deletion. On final fol. at top, in a different hand : श्रीपुसणं म्पवाडमध्ये लई ॥

Age.— Saṁvat 17[a].

Author.— Gaṅgārāma.

Begins.— fol. 1[b].

...शाय नमः ॥ श्रीराधाकृष्णाभ्यां नमः ॥
कृपासुधावृष्टिभृतः स्वभक्ति
स्ववाहिनी खेलित जीवपद्मी ।
श्रीकृष्णचैतन्यघनः सविद्युत्
गौ.....व्योमनिनश्चकास्तु ॥ १ ॥ etc.

Ends.— fol. 156[b].

इति श्रीमद्वृंदावनभूमिमंडकाखिले स्वरश्वरश्रीमद्राधाकृष्णचरणारविंद-मधुपायमान-श्रीगोस्वामीश्यामानंद-शिष्यश्रीरसिकानंदशिष्य-श्रीगोपाल दासशिष्य-कायस्थ-भट्टनागरज्ञातियेनाकश्यपगोत्रेण त्रिप्रवरेण यजुर्वेदा-ध्यायिना माध्यंदिनीशाखिना गंगारामेण भगवद्दासनामकात्मज-गोविंददासस्य पौत्रेणकृता प्रेमाब्धिरसकणिकायां महाप्रेमानुराग-वर्णनो नाम त्रयोदशोल्लासः ॥ १३ ॥

Then follow three verses in Hindi

॥ दोहा ॥ संग्राम सिंघराणा वसैं नग्र उदैपुरमध्य ॥
चिरंजीव रहि यौ सुफल कहत चंद्रसीध्य ॥ १ ॥

॥ दोहा ॥ तिनकैवंगसीभक्त निजु गंगाराम प्रधान
चिरंजीव रहियौ सदा कुटमसहित संतान ॥ २ ॥

प्रेमाब्धिरसकं निकासवग्रंथनकौ सार ।
नग्र उदैपुरमधि लिषीवै भवचंद विचार ॥ ३ ॥
॥ दोहा ॥ संवत् १७ शैकह्यौपरयौडनाह्रिय नाम । तिथि एकादश.
माहवदि चंद्रवासरे नाम ॥ ४ ॥

References.—
(1) Mss.— A-Aufrecht's Catalogus Catalogorum:—
II 78[a] (our Ms.)

बालबोध Bālabodha

No. 525 No. 716-B / 1884-87

Size.— 9½ in. by 5¼ in.
Extent.— 2 leaves; 10 lines to a page; 32 letters to a line.
Description.— Country paper; Devanāgarī Characters; handwriting good. Contains 18 verses only.
Age.— Old.
Author.— Vallabhācārya.
Begins.— fol. 2[b].

नत्वा हरिं सदानंदं सर्वसिद्धांतसंग्रहं ॥
बालप्रबोधनार्थाय वदामि सुविनिश्चितं ॥ १ ॥
धर्मार्थकाममोक्षाश्च(च)त्वारोर्था मनीषिणां ।
जीवेश्वरविचारेण द्विधा ते हि विचारिताः ॥ २ ॥

Ends.— fol. 5[b].

तदाश्रयदीयत्व बुद्धयै किंचित्समाचरेत् ॥
स्वधर्ममनुतिष्ठन्वै भारद्वैगुणमन्यथा ॥ १९ ॥
इत्येवं कथितं सर्वं नैतद्ज्ञाने भ्रमः पुनः ॥
इति वल्लभाचार्यविरचितो बालबोधः ॥ २ ॥ ॥ ठ ॥

References.—
(1) Mss.— A-Aufrecht's Catalogus Catalogorum:—
I 371[b]; III 79[a].
B-Descriptive Catalogues:—
Mad. Cat. XI, No. 5135 (p. 3937).
Velankar 1140.

बालबोधटीका

Bālabodhaṭīkā

No. 526

No. $\frac{715}{1887-91}$

Size.— 10½ in. by 4⅝ in.
Extent.— 9 leaves ; 10 lines to a page ; 39 letters to a line.
Description.— Soft country paper ; Devanāgarī Characters ; handwriting medium, bold, uniform. Borders ruled with double black lines. Edges frayed on right and left margins. Red chalk on key-words and lemmata.
Age.— Oldish.
Author.— Dvārakeśvara.
Begins.— fol. 1[b].

श्रीगोपीजनवल्लभाय नमः ॥

यत्पादमूलमुपसृत्य विशंति शश्वत्
वृंदावनद्रुमलताभुजपूजितांघ्रिं ।
सोयं समस्तजगतामभिवंदनीय
पादांबुजः सकरुणः प्रियमातनोतु ॥ १ ॥ etc.

Ends.— fol. 9[a].

एवं लौकिकानामलौकिकानामेकीकृत्य निरूपणे लौकिकेभ्य...येभ्योऽलौकिकानां सारोद्धाररूपेण सामान्येभ्यो विशेषाणां निरूपणं भवति तेनोभयजातीयानामेकविधिनामभिर्निरूपणेपि न ज्ञाने भ्रमो भवतीत्यर्थः ॥

इति द्वारकेश्वरविरचिता बालबोधटीका संपूर्णा

References.—
(1) Mss.— A-Aufrecht's Catalogus Catalogorum :—
III 79[a] (our Ms.).

बालबोधिनी

Bālabodhinī

No. 527

No. $\frac{282-A}{1879-80}$

Size.— 7 in. by 4⅝ in.
Extent.— 6 leaves; 11 lines to a page; 26 letters to a line.
Description.— Country paper thin, rough and grey. Devanāgarī Characters ; handwriting medium, beautiful and uniform. Borders ruled with two spaced sets of 3 and 2 red lines. Punctuation-marks in red as well as some key-words. Ms. contains 3 other works :— Svarūpanirṇaya, Ātmajñānopadeśavidhi and Triputīprakaraṇa, the last two forming one part with independent pagination.

Age.— Saṁvat 1865.
Author.— Śaṁkarācārya.
Begins.— fol. 1[b].

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥
ॐ प्रणम्य परमानंदं मोहांधतिमिरापहं ॥
तत्प्रसादबलेनैव क्रियते बालबोधिनी ॥ १ ॥
यस्य स्मरणमात्रेण क्षीयंते भवभीतयः ॥
तं सर्वसाक्षिणं यामि शरणं कृपणोऽहम् ॥ २ ॥
अथायमात्मा कीदृशः ॥ सद्रूपं सर्वथाभावरूपं चिद्रूपं शुद्धबोधरूपं आनंदरूपं सुखरूपं ... etc.

fol. 3[b].

इति बहिर्मुखांतः प्रवण बालबोधिन्यां प्रथमः कल्पः ॥ १ ॥

Ends.— fol. 6[a].

एवं साक्षात्कारे निःशेषाविद्याप्रतिबंधध्वंसे ततः प्रारब्धभोगक्षये शरीरपाताद्विदेहकैवल्यं भवतीति परमपुरुषार्थसिद्धिः ॥
विशुद्धबुद्धयो धीरा ज्ञानदीपकराः करे ॥
पश्यंति मणिवत् क्षिप्रं ततो ब्रह्म परं तु यत् ॥
इति श्रीमत्परमहंस ... गोविंद ... शिष्यशंकरभगवत्कृता बालबोधिनी समाप्तः ॥
संवत् १८६५ आषाढ वदी १४ भौमवार गुसाई तुलागीरजीशिष्य गोपालगिरजी ॥

References.—
(1) Mss.— A-Aufrecht's Catalogus Catalogorum :—
I 371[b] ; II 84[a] ; III 79[a].
B-Descriptive Catalogues :—
Ind. Off. Cat. 2300 (i), 7988
Velankar 1111.
(2) Printed Editions :—
Emeneau 1256, 2998, 3028.

बालबोधिनी

Bālabodhinī

No. 528

No. $\frac{772}{1891-95}$

Size.— $8\frac{3}{8}$ in. by $4\frac{1}{4}$ in.
Extent.— 7 leaves ; 9 lines to a page ; 27 letters to a line.
Description.— Rough country paper ; Devanāgarī Characters ; handwriting large, bold and uniform. No border ruling

except on last fol. bearing three red lines on each margin. Marginal additions and corrections.

Age.— Not very old.

Author.— Śaṁkarācārya.

Begins.— fol. 1[b].

श्रीगणेशाय नमः ॥ ॐ नमः परमात्मने ॥
प्रणम्य परमानंदं मोहांधतिमिरापहं ।
तत्प्रसादबलेनैव क्रियते बालबोधिनी ॥ १ ॥ etc.

Ends.— fol. 7[a].

विशुद्धबुद्धयो धीरा ज्ञानदीपकराः करे ।
पश्यंति मणिवत्क्षिप्त्वा तमो ब्रह्म परं तु यत् ॥ १ ॥
इति श्रीमत्परमहंसपरिव्राजकगोविंदभगवत्पादशिष्यशंकरभगवतः कृतौ बालबोधिनी समाप्ता ॥ ॐ तत् सत् ब्रह्मार्पणमस्तु ॥ मम ॥ राम ॥

बालबोधिनी — Bālabodhinī

No. 529 — No. 771/1891-95

Size.— 7⅞ in. by 4½ in.

Extent.— 7 leaves ; 9 lines to a page ; 24 letters to a line.

Description.— Thin country paper ; Devanāgarī Characters ; handwriting medium large, clear, uniform. Borders ruled with a single black line. All foll. discoloured by spreading of ink. Marginal additions and corrections in a different ink.

Age.— Old.

Author.— Śaṁkarācārya.

Begins.— fol. 1[a].

श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ ॐ
प्रणम्य परमानंदं मोहांधतिमिरापहं ।
तत्प्रसादबलेनैव क्रियते बालबोधिनी ॥ १ ॥ etc.

Ends.— fol. 7[b].

विशुद्धबुद्धयो धीरा ज्ञानदीपकराः करे ।
पश्यंति मणिवत् क्षिप्त्वा नमो ब्रह्मपरं तु यत् ॥
इति श्रीशंकराचार्यविरचितं बालबोधिनी प्रकरणं समाप्तम् ॥

बालबोधिनीटीका

Bālabodhinīṭīkā

No. 530

No. $\frac{615}{1881-87}$

Size.— $8\frac{7}{8}$ in. by $3\frac{1}{2}$ in.

Extent.— 8 leaves; 8 lines to a page; 29 letters to a line.

Description.— Country paper; Devanāgarī characters; handwriting medium large, clear and uniform. Borders ruled with double or two-spaced double black lines. Pṛṣṭhamātrās used. Lower ends of Ms. as well as the upper corners are cut, but without defacing text. Red chalk marks on each fol. on important words.

Age.— Saṁvat 1584.

Author.— Śaṁkarācārya.

Begins.— fol. 1^b.

ॐनमः श्रीरामाय ॥ अथ बहिर्मुखांतः प्रवणबालबोधिनीं व्याख्यास्यामः ।

प्रणम्य परमानंद etc. as in No. 527

Ends.— fol. 8^a.

एवं साक्षात्कारे etc. upto ब्रह्मपदं ततं as in No. 527 followed by इति श्रीसंक्षिप्तवेदान्तशास्त्रप्रक्रियायां परमहंसपरिव्राजकाचार्य-श्रीमच्छंकरकृता बहिर्मुखांतः प्रवणबालबोधिनी समाप्तेति ॥ छ ॥ शुभं भवतु ॥ संवत् १५८४ वर्षस्य प्रथम आखाड वदि चतुर्थ्यां तिथौ सोमदिने धवलकपुरे सत्यपुरज्ञातीय्या रामसुतगुणवंतपठनार्थं लिखितेयम् ॥ कल्याणं भूयात् ॥ श्रीरामाय नमः ॥

एक एव हि भूतात्मा भूते भूतेष्ववस्थितः ।
एकधा बहुधा चेति दृश्यते जलचंद्रवत् ॥ छ ॥ श्रीः ॥

बोधसार

Bodhasāra

No. 531

No. $\frac{774}{1891-95}$

Size.— $12\frac{1}{3}$ in. by $4\frac{3}{8}$ in.

Extent.— 87 leaves; 9 lines to a page; 30 letters to a line.

Description.— Country paper thick, rough and dark grey. Devanāgarī characters; handwriting large, clear and uniform. Borders ruled with double red lines. Some foll. discoloured. Fol. 1 smeared with black pigment leaving white lettering of the त्रयोदशाक्षर-मन्त्र.

Age.— Śaka 1711.

Author.— Narahari.
Begins.— fol. 1[b].

श्रीकृष्णाय नमः ॥
किंचित्कुतूहलेनैव विदुषां प्रियकाम्यया ॥
मंगलाचरणं कृत्वा बोधसारो निरूप्यते ॥ १ ॥
अनंतशक्तिसंदोहपूर्णस्य परमात्मनः ॥
विघ्नविध्वंसिनीं शक्तिं गणराजमुपास्महे ॥ २ ॥
या प्रकाशविमर्शाभ्यां स्वरूपावस्थितिं गता ॥
स्मरामि तामहं भक्त्या ज्ञानशक्तिं सरस्वतीं ॥ ३ ॥
अथ श्रीगुरुस्तवः ॥ etc.

Ends.— fol. 8[b].

गुरुभिर्दीक्षितानां च सर्वमेवेश्वरार्पणं ॥
अयं तु बोधसारोऽस्य मुक्तमेवेश्व(87[a])रार्पणं ॥ १३५१ ॥
इति श्रीनित्यमुक्तनरहरिविरचितो बोधसारः संपूर्णः ॥
शाके १७११ सौम्य नाम संवत्सरे दक्षिणायने हेमंतऋतौ पौष्यमासे शुक्लपक्षे
पंचम्यां इंदुवासरे मध्यान्हवेलायां बोधसारोयं समाप्तः ॥
श्रीमदानंदरायाणां पुत्रो नारायणाभिधः ॥
बोधसारं समलिखत् सद्ग्रंथं स्वकरेण हि ॥ १ ॥
श्रीकृष्णजयरामकाशीराजार्पणमस्तु शुभं भवतु
श्रीराम जयराम जयजय राम राम

References.—
(1) Mss.— A-Aufrecht's Catalogus Catalogorum :—
I 377[a]; III 80[b].
(2) Printed Editions :—
Emeneau 2819.

ब्रह्मगीता
(सटीका)

Brahmagītā
with commentary

No. 532

No. $\frac{117}{1899-1915}$

Size.— 13¼ in. by 7 in.

Extent.— 133 leaves ; 11 lines to a page ; 48 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting medium to large, clear and uniform. No border rulings. Text in centre, com. above and below it. Many foll. worm eaten or otherwise defaced.

Age.— Fairly old.
Author.— Com. Mādhavācārya.
Begins.— fol. 1[b].

श्रीगणेशाय नमः

Text.—

मुनय ऊचुः

भवता सर्वमाख्यातं संक्षेपाद्विस्तदपि ।
इदानीं श्रोतुमिच्छामो ब्रह्मगीतामनुत्तमाम् ॥ १ ॥ etc.

Com.—

विश्वेशं माधवं ढुंढिं दंडपाणिं च भैरवं ।
वंदे काशीं गुहां गंगां भवानीं मणिकर्णिकाम् ॥ १ ॥ etc.

Ends.— fol. 33[a].

Text.—

मुनयश्च गुरुं परवेदिनं प्रणिपत्य समस्तहितप्रदं ।
हृदयस्थ महं यदलक्षितं परतत्वतयैव विदुःस्थिरम् ॥ ७७ ॥

इति श्रीस्कन्दपुराणे सूतसंहितायां यज्ञवैभवखण्डेस्योपरिभागे ब्रह्मगीतासूपनिषत्सु ब्रह्मविद्यायां द्वादशोध्यायः ॥ १२ ॥
ब्रह्मगीता समाप्तम् ॥ श्रीसांबाय नमः ॥

Com.—

इति श्रीमत्काशीविलासक्रियाशक्ति-परमभक्त-श्रीमत्र्यंबकपादाब्जसेवा परायणेनोपनिषन्मार्गप्रवर्त्तकेन माधवाचार्येण विरचितायां सूतसंहिता-तात्पर्यदीपिकायां यज्ञवैभवखण्डस्योपरिभागे ॐ तत्सदिति श्रीब्रह्म-गीतायां द्वादशोध्यायः ॥ १२ ॥

ब्रह्मगीता
(सटीका)

Brahmagītā
(with commentary)

No. 533

No. $\frac{260}{1882-83}$

Size.— 11⅛ in. by 6½ in.

Extent.— 121 leaves ; 14 lines to a page ; 44 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting large, clear and uniform. Borders ruled with double black lines. Marginal corrections and additions. Yellow pigment

used for deletion ; verse numbers, beginning and important words smeared with red chalk. Text in centre, comm. above and below it.

Age.— Saṁvat 1889.

Author.— Com. Mādhavācārya.

Begins.— fol. 1[b].

Text—

ॐ नमः परमात्मने ॥ मुनय ऊचुः ।
भवता सर्वमाख्यातं संक्षेपाद्विस्तरादपि ।
इदानीं श्रोतुमिच्छामो ब्रह्मगीतामनुत्तमाम् ॥ १ ॥ etc.

Com.—

ॐ नमः शिवाय । भवानीशंकरः सहाय । ॐ नमः ।
श्रीशंकरानंदगुरुपादांबुजन्मने ।
सविलासमहामोहग्राहग्रासैककर्मिणे ॥ १ ॥ etc.

Ends.— fol. 121[a].

Text.—

मुनयश्च गुरुं परवेदनं प्रणिपत्य समस्तहितप्रदं ।
हृदयस्थमहं पदलक्षितं परतत्वतयैव विदुः स्थिरम् ॥ ७ ॥
इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडस्योपरि-
भागे ब्रह्मगीतासूपनिषत्सु ब्रह्मविद्यायां द्वादशोऽध्यायः
समाप्तः ॥ शुभं भवतु ॥ शिवं भवतु ।

Com.—

इति श्रीस्कंदपुराणे सूतसंहितायां श्रीमत्काशीविलासक्रियाशक्तिपरमभक्त-
श्रीमत् त्र्यंबकपादाब्जसेवापरायणे नोपनिषन्मार्ग-प्रवर्त्ता च केन माधवा-
चार्येण विरचितायां सूतसंहितायां तात्पर्यदीपिकायां यज्ञवैभवखण्डस्यो-
परिभागे ब्रह्मविद्यासूपनिषत्सु ब्रह्मविद्यायां द्वादशोऽध्यायः समाप्तेयं गीता ॥
साधु विजियानंदेन लिखिता संवत् १८८९ श्रावणमासे शुक्लपक्षे त्रयो-
दश्यायां चंद्रवासरे ॥

References.—

(1) Mss.—A-Aufrecht's Catalogus Catalogorum :—
I 380[b]; II 85[b], 213[a]; III 81[a],[b].

B-Descriptive Catalogues :—
Ind. Off. Cat. II No. 6919.

ब्रह्मज्ञानोपदेश Brahmajñānopadeśa

No. 534 No. $\frac{158}{1887-91}$

Size.— 11½ in. by 5⅝ in.

Extent.— 6 leaves ; 12 lines to a page ; 39 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting clear, legible and uniform ; red pigment very often used ; complete.

Begins.— fol. 1[b].

श्रीराधाकृष्णाय ।
एतच्छास्त्रार्थतात्पर्याछादनायात्र पंचमे ।
ब्रह्मज्ञानोपदेशः श्रीमुनींद्रेण नृपे कृतः ॥
शास्त्रार्थमुपसंहृत्य श्रीमुनींद्रः किंचिदात्मनैव परामर्शं etc.

Ends.— fol. 6[b].

एतत् ब्रह्मज्ञानं त्वया संप्रत्यपृष्टमपि ते कथितं यद्धरोश्रेष्टां
लालां आत्मा त्वं पृष्टवान् मां पूर्वमपृच्छः तां तु पूर्वमेवावोच-
मिति शेषः शिष्यस्य तस्य पूर्णत्वज्ञापनाय पृच्छति किमिति १४
इति सारेत्यादि ॥
द्वादशे पंचमोध्यायः संगतः संगतः सतां ॥

ब्रह्मज्ञानोपदेश Brahmajñānopadeśa

No. 535 No. $\frac{760\text{-A}}{1891-95}$

Size.— 10¾ in. by 4¾ in.

Extent.— 11 leaves ; 9 lines to a page ; 34 letters to a line.

Description.— Country paper thick, rough, greyish and discoloured. Devanāgarī characters ; handwriting large, clear and uniform. Borders ruled with double black lines. Red chalk marks beginning, colophon and verse-numbers. There are altogether 154 verses of which the last three have not been numbered. Speakers' names also coloured with red chalk. The last 7 foll. (i. e. foll. 17–23) of our Ms. form part of another work: *Tattvasāra* (No. 760–C of 1891–95) and foll. 11–17 another work. *Amanaska* (Layakhaṇḍa) (No. 760–B of 1891–95).

Age.— Appears to be old.

Begins.— fol. 1[b].

ॐ नमः शिवाय ॥
ॐ नमोव्यक्तरूपाय परब्रह्मस्वरूपिणे ॥
शब्दरूपरसस्पर्शगंधाद्याकारवर्जिते ॥ १ ॥
स्यादर्वाचीनपराचीनावस्थाभेदेन तु द्विधा ॥
सृष्टिपालनसंहारकादिदेवात्रयात्मकं ॥ २ ॥ etc.

Ends.— fol. 11[a].

कल्पद्रुचिंतामणिकामधेनु कर्तुं समर्थो इह भुक्तिमात्रं ॥
अध्यात्मविद्याविधिना प्रयुक्ता ददाति सद्यः किल भुक्तिमुक्ती ॥
इति श्रीमहेश्वरेणोक्तं पार्वतीप्रश्नोत्तरं ब्रह्मज्ञानोपदेशं संपूर्णं ॥

References.—

(1) Mss.— A-Aufrecht's Catalogus Catalogorum :—
I 380[b]; III 81[b].

ब्रह्मवाद Brahmavāda

No. 536 No. $\frac{716}{1887-91}$

Size.— 11¼ in. by 5¼ in.

Extent.— 8 leaves ; 11 lines to a page ; 31 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting large, bold, uniform, not clear. Borders ruled with double black lines. Marginal and interlinear additions and corrections. Yellow pigment used for deletion. Red chalk on key-words. Fol. 1 *a* contains a Gopījanavallabhāṣṭaka by Vallabhācārya.

Author.— Vrajanātha.

Begins.— fol. 1[b].

श्रीमत्कदंबदैवतश्रीगोपीजनवल्लभो जयतु ।
विशेषैः प्राकृतैः शून्यमप्राकृतविशेषवत् ।
अशेषोपनिषद्वेद्यं परं ब्रह्मास्तु ते मुदे ॥ १ ॥

ननु कथमयमपूर्वः प्रस्तावः क्रियते । ननु कथमस्याऽपूर्वत्वं निखिलप्रमाणसिद्धत्वात् इति चेन्न । etc.

Ends.— fol. 9[b].

तथा चैतादृशं ब्रह्मवाच्छितप्रदानेन ते मुदे प्रीतयेस्त्विवस्याशिर्वचनम् ॥ १ ॥
इति श्रीगोस्वामिश्रीरघुनाथात्मज-व्रजनाथविरचितो ब्रह्मवादः संपूर्णः ॥
श्रीगोपीजनवल्लभाय नमः ॥

References.—

(1) Mss.— A–Aufrecht's Catalogus Catalogorum :—
Brahmavāda of Vajranath II 213[a] (corrected to Vrajanātha at III 81[b]); of Vrajanātha— III 81[b] (our Ms.).

(2) Printed Editions :—
Emeneau 2783.

ब्रह्मवादकारिका
(सटीका)

Brahmavādakārikā
(with Commentary)

No. 537

No. $\frac{229}{1884-86}$

Size.— 10 in. by 4⅝ in.

Extent.— 5 leaves ; 10 lines to a page ; 32 letters to a line.

Description.— Country paper thick, rough and grey ; Devanāgarī characters ; handwriting large, bold and clear in text, smaller in commentary. Text, containing 11 verses is followed by the commentary.

Author.— Text.— Harirāya.
Comm.— Gokulabhaṭṭa (son of Vrajavallabha).

Subject.— Vallabhamata.

Begins.— fol. 1[b].

श्रीहरिर्जयति ॥
ब्रह्माभिन्नः प्रपंचश्चे(द्ब्रह्म)दविषयः कथं ॥
ब्रह्माभिन्नः प्रपंचश्चेद्ब्रह्मविद्विषयः कथं ॥ १ ॥
अतो भेदस्तथा भेदः शक्यते वदितुं कथं ॥
इति चेन्न यथा ब्रह्म रूप्यते तत्प्रपंचयोः ॥ २ ॥ etc.

Comm.— fol. 2[a].

अथ ब्रह्मवादस्य विवृतिः ॥
या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॥
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥
इति वाक्याद्ब्रह्मस्वरूपं ब्रह्मविदां विषयः ॥ अस्मदादीनां तु अविषयः ॥
ब्रह्माभिन्नं च अस्मदादीनां विषयः ॥ etc.

Ends.— Text fol. 2[a].

विचार्यं वल्लभाचार्यप्रचायमतमायजाः ॥
विदार्थं संशयं कार्यमनार्थमतदूषण ॥ ११ ॥
इति श्रीहरिरायजीकृत-ब्रह्मवादोयं ॥

Comm.— fol. 5[a].

एवं भूतं श्रीवल्लभाचार्याणां मतं ॥
सर्वेभ्योऽनुगृ-(fol. 5[b])हीतेभ्यः कथनीयं ॥ सद्भिः विचार्यं
तेनैव सर्वान् संदेहान्निवार्यं अनार्थमतानि दूषणीयानि ॥
न तु तेषु मतेषु आसक्तिः कार्या ॥ नापि ब्रह्मवादे संदेहः कार्यं इति ॥ ॥
इति श्रीहरिरायजीकृतकारिकानां विवृत्तिगोकुलभट्टेन कृतातिघरोपनाम्ना व्रजवल्लभसुतेन

References.—

(1) Mss.— A-Aufrecht's Catalogus Catalogorum :—
I 95[b].

(2) Printed Editions :—
Emeneau 2783.

ब्रह्ममीमांसासूत्र — Brahmamīmāṁsāsūtra

No. 538 — No. $\frac{558}{1886-92}$

Size.— 9¾ in. by 4½ in.

Extent.— 17 leaves ; 8 lines to a page ; 24 letters to a line.

Description.— Country paper thin, grey and smooth ; Devanāgarī characters ; handwriting bold, clear, beautiful and uniform ; occasional marginal corrections ; red chalk used for marking sectional colophons ; *sūtra* numbers fully indicated. fol. 16 is torn, worn out and badly preserved.

Age.— Appears old.

Author.— Kṛṣṇa Dvaipāyana (= Vyāsa).

Begins.— fol. 1[a].

॥ श्रीगणेशाय नमः ॥ अथातो ब्रह्मजिज्ञासा ॥ १ ॥ etc.

Ends.—fol. 17[a].

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥
इति चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥
इति श्रीभगवत्कृष्णद्वैपायनकृतेषु ब्रह्ममीमांसासूत्रेषु चतुर्थोध्यायः समाप्तः ॥ संपूर्णम् ॥ ॥

ब्रह्ममीमांसासूत्र Brahmamīmāṁsāsūtra

No. 539 No. $\frac{257}{1892-95}$

Size.— $9\frac{3}{8}$ in. by $5\frac{7}{8}$ in.

Extent.— 6 leaves ; 16 lines to a page ; 33 letters to a line.

Description.— Country paper thick, rough and greyish; Devanāgarī characters ; handwriting medium, clear and uniform ; borders ruled with double black lines ; occasional marginal additions and corrections.

Age.— Fairly old.

Author.— Kṛṣṇa Dvaipāyana.

Begins.— fol. 1[a].

॥ श्रीराधावल्लभो जयति ॥ अथातो ब्रह्मजिज्ञासा ॥ १ ॥ etc.

Ends.— fol. 6[a].

अनावृत्तिः शब्दादनावृत्ति शब्दात् ॥ २२ ॥

इति श्रीभगवत्कृष्णद्वैपायनकृतेषु ब्रह्ममीमांसासूत्रेषु चतुर्थोध्यायः समाप्तः ॥

ब्रह्मसूत्र Brahmasūtra

No. 540 No. $\frac{87}{\text{Viśrāma I}}$

Size.— $9\frac{3}{4}$ in. by $4\frac{1}{8}$ in.

Extent.— 16 leaves ; 5 lines to a page ; 23 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting medium, clear and legible. Large margins on all sides. Borders ruled with double red lines. Foll. worm-eaten on right marginal corner; left margin discoloured. Incomplate.

Age.— Fairly old.

Begins.— fol. 1[b].

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ अथातो ब्रह्मजिज्ञासा जन्माद्यस्य यतः ॥ etc.

Ends.— fol. 16[b].

प्रकाशाश्रयत्वाद्वा तेजस्त्वात् ॥ पूर्ववद्वा ॥ प्रतिषेधाच्च ॥ पर

ब्रह्मसूत्र Brahmasūtra

No. 541 No. $\frac{787}{1891-95}$

Size.— 9¼ in. by 5 in.

Extent.— 11 leaves ; 14 lines to a page ; 27 letters to a line.

Description.— Dark Country paper ; Devanāgarī characters ; hand writing large, bold, uniform. Borders ruled with double red lines. Several foll. repaired ; a few painted with yellow pigment. Punctuation marks in red. Yellow pigment used for deletion.

Age.— Old.

Author.— Vyāsa.

Begins.— fol. 1[b].

श्रीपरमात्मने नमः ।

अथातो ब्रह्मजिज्ञासेति ॥ १ ॥ जन्माद्यस्य यत इति ॥ २ ॥
शास्त्रयोनित्वादिति ॥ ३ ॥ etc.

Ends.— fol. 11[b].

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥ भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥
अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥
इति श्रीमच्छारीरकमीमांसाचतुर्थाध्याये चतुर्थपादः ॥ ४ ॥
श्री ॥ श्री ॥ श्री ॥

References.—

(1) Mss.— A-Aufrecht's Catalogus Catalogorum :—
I 383[b]; II 213[b], 86[b]; III 82[a].
B-Descriptive Catalogues :—
Ind. Off. Cat. Nos. 2218-22, 5921, 5931-2, 7978 ; Velankar 1113 ; Mad. Cat. IX, Nos. 4649-57 (pp. 3463-5).

(2) Printed Editions :—
Emeneau 2423, 2775, 2842-2913.

ब्रह्मसूत्र Brahmasūtra

No. 542 No. $\frac{23\ (i)}{\text{Viśrāma I}}$

Size.— 13⅛ in. by 4½ in.

Extent.— 8 leaves ; 9 lines to a page ; 49 letters to a line.

Description.— Modern water-lined paper bearing water-mark date 1819 ; Devanāgarī characters ; handwriting medium bold and uniform. Borders ruled with two red lines An excellent transcript.

Age.— Modern.

Author.— Vyāsa Bādarāyaṇa.

Begins.— fol. 1[b].

ॐ नमः परमात्मने । ॐ अथातो ब्रह्मजिज्ञासा ॥ १ ॥ जन्माद्यस्य यतः ॥ २ ॥
शास्त्रयोनित्वात् ॥ ३ ॥ etc.

Ends.— fol. 8[b].

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥ भोगमात्रसाम्यलिंगाच्च ॥ २१ ॥
अनावृत्तिः शब्दादनावृत्तिशब्दात् ॥ २२ ॥
इति श्रीव्याससूत्रे चतुर्थाध्यायस्य चतुर्थः पादसमाप्तः ॥
शुभं भवतु । श्रीर्जयती

ब्रह्मसूत्र Brahmasūtra

No. 543 No. $\frac{251}{1882\text{–}83}$

Size.— 8¾ in. by 3½ in.

Extent.— 24 leaves ; 6 lines to a page ; 24 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting large, clear and uniform. No border ruling. Occasional marginal corrections. Yellow pigment used for deletion.

Age.— Not modern.

Author.— Veda Vyāsa.

Begins.— fol. 1[b].

श्रीगणेशाय नमः ॥ ॐ ॥ अथातो ब्रह्मजिज्ञासा ॥ जन्माद्यस्य यतः ।
शास्त्रयोनित्वात् । तत्तु समन्वयात् etc.

Ends.— fol. 24[a].

दर्शयतश्च । प्रत्यक्षानुमाने । भोगमात्रसाम्यलिंगाच्च ।
अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥
इति श्रीवेदव्यासविरचितानि ब्रह्मसूत्राणि संपूर्णानि ॥
श्री ॥ अथाधिकरण संख्या १९३ प्रथमेध्याये ४० द्वितीये ४७ तृतीये ६७ चतुर्थे ३९ तत्र प्रथमे पादे ११ द्वितीये ७ तृतीये १४ चतुर्थे ८॥ द्वितीयस्य प्रथमे १२ द्वितीये ८ तृतीये १८ चतुर्थे ९ । तृतीयस्य प्रथमे ६ द्वितीये ८ तृतीये ३६ चतुर्थे १७ । चतुर्थस्य प्रथमे पादे १४ द्वितीये ११ तृतीये ६ चतुर्थे ८ ॥ इत्यधिकरणसंख्याः ॥ श्री ॥

ब्रह्मसूत्र — Brahmasūtra

No. 544 — No. $\frac{357}{1899-1915}$

Size.— 8¼ in. by 4 in.

Extent.— 14 leaves ; 9 lines to a page ; 34 letters to a line.

Description.— Thin Country paper ; Devanāgarī characters ; hand-writing medium, bold, uniform. No border-ruling. Foll. discoloured. In the numbering of the sūtras both the serial number and the *adhikaraṇa* numbers are given.

Age.— Fairly old.

Author.— Vyāsa.

Begins.— fol. 1[b].

श्रीवासुदेवो जयति । श्रीगुरुभ्यो नमः ॥
शारीरसूत्रं लिख्यते । अथातो ब्रह्मजिज्ञासा ॥ १ ॥ जन्माद्यस्य यतः २।२ शास्त्रयोनित्वात् ३।३ etc.

Ends.— fol. 14[b].

ॐ तत्सदिति शारीरकमीमांसव्यासप्रणीते ब्रह्मसूत्रे चतुर्थोध्यायं चतुर्थपादः समाप्तः ४ सूत्राणि २२ अधिकरणानि ७ चतुर्थाध्यायस्य सूत्राणि ७९ अधिकरणानि ३८ समग्रसूत्रसंख्या ५५८ अधिकरणसंख्या १९१ एवं समाप्तः

followed by two verses :—

अशुभानि निराचष्टे तनोति शुभसंततिं ।
स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मंगलं विदुः ॥ १ ॥
अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात् ।
स्मर्तॄणां वरदत्वाच्च ब्रह्म तन्मंगलं विदुः ॥ २ ॥

ब्रह्मसूत्र Brahmasūtra

No. 545 No. $\frac{657}{1887-91}$

Size.— 10 in. by 5 in.

Extent.— 13 leaves; 9 lines to a page; 33 letters to a line.

Description.— Thin country paper; Devanāgarī characters; handwriting bold, medium large, uniform. No border rulings or punctuation-marks. White pigment for deletion. Sūtras numbered. Marginal corections.

Age.— Not very old.

Author.— Veda Vyāsa.

Begins.— fol. 1[b].

श्रीगणेशाय नमः ॐ अथातो ब्रह्मजिज्ञासा १ etc.

Ends.— fol. 13[a].

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २४ ॥

इति श्रीकृष्णद्वैपायनकृत-ब्रह्मसूत्रेषु चतुर्थाध्यायस्य चतुर्थः पादः ॥
इति चतुर्थाध्यायः समाप्तः श्रीरस्तु ॥

Then follow the Sāṁkya sūtras.

ब्रह्मसूत्र Brahmasūtra

No. 546 No. $\frac{656}{1887-91}$

Size.— 10 in. by 4⅝ in.

Extent.— 11 leaves; 11 lines to a page; 35 letters to a line.

Description.— Tough country paper; Devanāgarī characters; handwriting bold, large and uniform. Borders ruled with three red lines. Red chalk smeared over beginning, end and sectional colophons and punctuation-marks at the end of *adhikaraṇas*. Yellow pigment for deletion. Marginal additions and corrections. On fol. 1[b], above and below in the top and bottom margins.

श्रीवल्लभकृपासिंधुः कृपयिष्यति मां यदा ।
तदानंदागनोत्संगललितः करलालितः ॥ १ ॥
यः सर्वज्ञः सर्वशक्तिः सर्वात्मा करुणाकरः ।
स तु दासे मयि निजे कृपयिष्यति सर्वथा ॥ १ ॥

Age.— Fairly old.
Author.— Veda Vyāsa
Begins.— fol. 1[b].

श्रीकृष्णाय नमः ॥ श्रीगोपीजनवल्लभाय नमः ॥
अथातो ब्रह्मजिज्ञासा ॥ १ ॥ जन्माद्यस्य यतः ॥ २ ॥
शास्त्रयोनित्वात् ॥ तत्तु समन्वयात् ॥ etc.

Ends.— fol. 11[a].

भोगमात्रसाम्यलिंगाच्च । अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।
इति श्रीवेदव्यासविरचितब्रह्मसूत्रेषु चतुर्थाध्यायस्य चतुर्थपादः समाप्तः ॥ समाप्तश्चायं चतुर्थोध्यायः ॥ इति श्रीमद्वेदव्यासविरचितानि ब्रह्मसूत्राणि संपूर्णानि । तत्सत् । अथाधिकरणं संख्या ॥ १९३ ॥ प्रथमेध्याये ४० द्वि. १४७ ॥ तृती. ६७ चतु. ३९ तत्र प्रथमाध्यायस्य प्रथमे पादे ११ द्वि. ७ तृती. १४ च. ८ द्वितीय. प्र. १२ द्वि. ८ तृ. ७७ च. ९ तृतीय. प्र. ६ द्वि. ८ तृ. ३६ चतुर्थस्य. प्र. १४ द्वि. ११ तृ. ६ च. ८ इत्यधिकरण-संख्या ॥ छ ॥ छ ॥ छ ॥

ब्रह्मसूत्रभाष्य — Brahmasūtrabhāṣya

No. 547 — No. 313/1879-80

Size.— 10¼ in. by 5⅝ in.
Extent.— 595 leaves ; 9 lines to a page ; 29 letters to a line.
Description.— Country paper ; Devanāgarī characters ; handwriting bold and uniform. Borders ruled with double red lines. Marginal additions copious. Yellow pigment used for deletions. A very good Ms. of the text.
Age.— Saṁvat 1822.
Author.— Saṁkarācārya.
Begins.— fol. 1[b].

श्रीसच्चिदानंदात्मने नमः ॥ ॥ अथ श्रीमच्छारीरकमीमांसाभाष्यं लिख्यते ॥ ॥
युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोः तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासस्तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषये ध्यासो मिथ्येति भवितुं युक्तम् । etc.

Ends.— fol. 595[a],

अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥ ६ ॥
इति श्रीमच्छारीरक-मीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ
चतुर्थाध्यायस्य चतुर्थः पादः समाप्तोयं ग्रंथः ॥
स्वस्तश्रीनृपविक्रमार्कशरदे द्वाविंशमष्टादशे
पौषे कृष्णनवम्यमर्कदिवसे स्वच्छे पुरे नौतने ।
जामश्रीलषपत्सु राज्यमचले शारीरभाषा स्वयं
लिख्येद्वैद्यदयालविष्णुवृष्ण्यपठनार्थे सर्वशास्त्रार्थवित् ॥
उद्भाश्रीजगजीवनद्विजवरशृंगारछत्रेमणि-
कल्पपादपवांछितार्थकरणे पांडित्यदानेश्वर ।
देशं राज्यपुरोहितार्थमखिले संते द्विजे सज्जन
ज्ञाने चापि जितेंद्रिया जितमना सर्वैकशांते स्थिति ॥ १ ॥
स्वस्ति श्रीनृपविक्रमार्कसमयात्संवद्विनेत्रद्विप
क्ष्माप्रामाण्यमुपागते खलु तथा तिष्येव लक्षे दले ।
नंदासूर्यदिने नवीननगरे श्रीलक्षजिच्छासने
शारीरं व्यलिखद्दयालु ठकुरो वैद्यो विदां प्रीतिकृत् ॥ १ ॥

ब्रह्मसूत्रभाष्य — Brahmasūtrabhāṣya

No. 548 — No. 23 (ii) / Viśrāma I

Size.— 13⅛ in. by 4½ in.

Extent.— 237 leaves ; 9 lines to a page ; 49 letters to a line.

Description.— Modern paper bearing water-mark date 1819 ; Devanāgarī characters ; handwriting medium, bold and uniform. Borders ruled with three red lines. An excellent transcript. Yellow pigment occasionally used. Title should be *Śārīrikamīmāṁsā bhāṣya*.

Pagination as follows :—

Adhy. I. i, 40
,, I. ii-iv 74
,, II. 91
,, III. 94.
,, IV. 38

Age.— Modern Copy.

Author.— Com. Śaṁkara.
Begins.— fol. 1[b]. (Adhy. I, pāda I.)

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

ॐ युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ etc.

Ends.— fol. 37. (Adhy 4, pāda iv)

अनावृत्तिः शब्दादनावृत्तिः शब्दादित्यभ्यासः शास्त्रपरिसमाप्तिद्योतयति ॥ इति श्रीशारीरकमीमांसाभाष्ये शङ्करभ (ग)वत्पादकृतौ चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥ छ ॥ छ ॥

ब्रह्मसूत्रभाष्य — Brahmasūtrabhāṣya

No. 549 — No. $\frac{197}{\text{Viśrāma I}}$

Size.— 11⅛ in. by 5⅛ in.

Extent.— 408 leaves ; 10 lines to a page ; 35 letters to a line.

Description.— Country paper; Devanāgarī characters; hand-writing large, bold and uniform. Borders ruled with multiple red lines. Red chalk smeared on punctuation marks, and key passages. Most foll. discoloured. First 61 foll. missing.

Age.— Old.

Author.— Śaṁkarācārya.

Begins.— fol. 62[a].

दित्येव प्राप्ते ब्रूमः परमेश्वर एवाक्षिण्यभ्यन्तरः पुरुष इहोपदिष्ट इति कस्मादुपपत्ते उपपद्यते हि परमेश्वरे गुणजातमिहोपदिश्यमानमात्मत्वं तावन्मुख्यवृत्त्या परमेश्वरं उपपद्यते स आत्मा तत्त्वमसीति श्रुते । etc.

Ends.— fol. 469[b].

अनावृत्तिः शब्दादिति सूत्राभ्यासः ॥ शास्त्रपरिसमाप्तिं द्योतयति ॥ ॥

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवत्पादकृतौ श्रीमच्छारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥ श्रीरामचन्द्राय नमः ॥

यादृशं पुस्तकं etc.

ब्रह्मसूत्रभाष्य Brahmasūtrabhāṣya

No. 550 No. $\frac{366}{1891-95}$

Size.— 12 in. by 4¼ in.

Extent.— 88 + 282 = 370 leaves ; 13 lines to a page ; 42 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting medium, clear, not uniform. 2nd set fol. 9 repeated, 13 missing and fol. 221 repeated. Borders ruled with two lines. Foll. frayed at ends, and slightly discoloured. Yellow and white pigments used for deletion ; marginal additions and corrections. Red chalk used occasionally for key-words. A carelessly written Ms.

Age.— Saṁvat 1758; Śaka 1623.

Author.— Śaṁkarācārya.

Begins.— fol. 1[b].

श्रीगुरुभ्यो नमः । श्रीशङ्कराचार्येभ्यो नमः ।

युष्मदस्मत्प्रत्ययगोचरयोर्विषयिणोस्तमः प्रकाशव...रुद्धस्व भावयोरितरेतर-भावानुपपत्तौ सिद्धायां । etc.

Ends.— fol. 287[b].

सहातः परमित्यत्र सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धं वा नावृत्तिः तदा भ्रमणेनैव हि सगुणशरगुणानामप्यनावृत्तिसिद्धिरिति ॥ अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ।

इति श्रीशारीरकमीमांसाभाष्ये शङ्करभगवत्पा(द)कृतौ चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ संवत् १७५८ शाके १६२३ मासोत्तममासे भाद्रपदमासे कृष्णपक्षे तिथौ ४ शौम्यवासरे सारीरभाष्ये समाप्तः ॥ लिखितं डेडामिश्रगौड ॥ शुभमस्तु ॥ छ ॥ छ ॥ छ ॥

ब्रह्मसूत्रभाष्य Brahmasūtrabhāṣya

No. 551 No. $\frac{621}{1884-87}$

Size.— 9¾ in. by 4⅓ in.

Extent.— 101 leaves ; 12 lines to a page ; 40 letters to a line.

Description.— Dark Country paper ; Devanāgarī characters ; handwriting small, legible, not uniform ; folios missing 6. No

border ruling. Marginal corrections and additions. Red chalk on key-passages. Incomplete.

Age.— Appearance old.

Author.— Śaṁkarācārya.

Begins.— fol. 1[b].

श्रीगणपतये नमः ॥

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः प्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणमपि सुतरामितरेतरभावानुपपत्तिरित्यतो etc.

Ends.— fol. 102[b].

यत्तावदभिहितं विलक्षणत्वान्नेदं जगद्ब्रह्मप्रकृतिकमिति प्रधानप्रकृतिकतायामपि समानमेतच्छब्दादिहीनात् प्रधानाच्छब्दादिमतो जगतउत्पत्त्यभ्युपगमादत एव च विलक्षणकार्योत्पत्त्यभ्युपगमात्समानः प्रागुत्पत्तेरसत्कार्यवादप्रसंगस्तथापीतौ कार्यस्य कारणेऽविभागाभ्युपगमात्तद्वत्प्रसंगोपि समानस्तथामृदितसर्वविशेशेषु विका

ब्रह्मसूत्रभाष्य — Brahmasūtrabhāṣya

No. 552 — No. 622/1884–87

Size.— 9⅞ in. by 4⅜ in.

Extent.— 134 leaves ; 10 lines to a page ; 38 letters to a line.

Description.— Thin country paper ; Devanāgarī characters ; handwriting bold, clear and uniform. Folios missing 1-5,10,51. Borders ruled with two spaced double black lines. Yellow pigment for deletion ; red chalk on key-words. Marginal additions and corrections. Discolouration of all folios. Ends with chap. I. only.

Age.— Fairly old.

Author.— Śaṁkarācārya.

Begins.— fol. 6[a].

...माश्रयाः संतः । तत्राविचार्य यत्किंचित् प्रतिपद्यमानो निश्रेयसात्प्रतिहन्येत । अनर्थं चेयात । तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेन वेदांतवाक्यमीमांसा तदविरोधितर्कोपकरणानिश्रेयसप्रयोजनाप्रस्तुयते । etc.

Ends.— fol. 141[a].

एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वे वा एवादि (?) कारणवादा अपि प्रतिषिद्धतया व्याख्याता वेदितव्यास्तेषामपि प्रधानवद-शब्दत्वात् शब्दविरोधित्वाच्चेति व्याख्याता व्याख्याता इति पदाभ्या-*सोध्याय परिध्याय परिसमाप्तिं दर्शयति ॥ छ ॥ छ ॥*

इति श्रीशारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ प्रथमस्याध्यायस्य चतुर्थः चरणः ॥ छ ॥ समाप्तप्रथमोध्यायः ॥ शारीरभाष्ये प्रथमो अध्यायः ॥ रामः ॥

ब्रह्मसूत्रभाष्य — Brahmasūtrabhāṣya

No. 553 — No. $\frac{623}{1884-87}$

Size— 10⅛ in. by 4½ in.

Extent.— 94 leaves ; 12 lines to a page ; 40 letters to a line.

Description.— Country paper; Devanāgarī characters; handwriting bold, clear and uniform. Borders ruled with three black lines. Yellow pigment used for deletion. Marginal corrections and additions. Red chalk on key-words. Contains the 2nd adhy. only.

Age.— Farily old.

Author.— Śaṁkarācārya.

Begins.— fol. 1[b].

श्रीमंगलमूर्त्तये नमः ॥ श्रीदत्तगुरुमूर्त्तये नमः ॥
श्रीवेदव्यासाय नमः ॥ श्रीशंकराचार्यब्रह्ममूर्त्तये नमः ॥
श्रीज्ञानेश्वराय नमः ॥

स्मृत्यनवकाशदोषप्रसंगादिति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥ प्रथमेध्याये सर्वज्ञः सर्वेश्वरो जगतउत्पत्तिकारणं मृत् सुवर्णादय इव घटरुचकादीनामुत्पन्नस्य च जगतो नियंतृत्वेन स्थितिकारणं etc.

Ends.— fol. 94[b].

तस्मात्सत्यपि त्रिवृत्करणं वैशेष्यादेष तेजोवन्नविशेषवादो भूतभौतिकविषय उपपद्यते। तद्वादस्तद्वाद इति पदाभ्यासोध्यायपरिसमाप्तिं द्योतयति ॥ छ ॥

इति श्रीमच्छारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ श्रीगुरुदक्षिणामूर्त्तये नमः ॥ श्रीः श्रीकाशीविश्वेश्वरार्पणमस्तु। राघवानंदस्येदं पुस्तकम् ॥

ब्रह्मसूत्रभाष्य Brahmasūtrabhāṣya

No. 554 No. $\frac{624}{1884-87}$

Size.— 10½ in. by 4½ in.

Extent.— 83 leaves ; 12 lines to a page ; 36 letters to a line.

Description.— Country paper; Devanāgarī characters; handwriting medium, bold and uniform. Folios missing 21-5. Borders ruled with three or four black lines. Yellow pigment for deletion. Marginal corrections and additions. Red chalk smeared over key-words. Most folios discoloured. The Ms. contains the 3rd adhy. only.

Age.— Farily old.

Author.— Śaṁkarācārya.

Begins.— fol. 1ª.

श्रीमंगलमूर्त्तये नमः श्रीदत्तगुरुमूर्त्तये नमः ॥ श्रीवेदव्यासाय नमः ॥ श्रीमच्छंकराचार्यब्रह्ममूर्त्तये नमः ॥ श्रीज्ञानेश्वराय नमः ॥

तदनंतरप्रतिपत्तौ रंहति संपरिष्वक्तप्रश्ननिरूपणाभ्यां । द्वितीयेध्याये स्मृतिन्यायविरोधो वेदांतविहिते ब्रह्मदर्शने परिहृतः । परपक्षाणां चानपेक्षत्वं प्रपंचितम् ॥ etc.

Ends.— fol. 88ª.

नैवं निर्गुणायां विद्यायां गुणाभावात्तथा च स्मृति-स्मृतिर्बहिगतिरधिकास्ति । कस्यचित्सति हि गुणे प्रवदंत्यतुल्यतामिति तदवस्थावधृतेस्तदवस्थावधृतेरिति । पदाभ्यासोध्याय परिसमाप्तिं द्योतयति ।

इति श्रीशारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवतः कृतौ तृतीयाध्यायस्य चतुर्थः पादः परिसमाप्तः श्रीकृष्णार्पणमस्तु ॥ राघवानंदस्येदं पुस्तकम् ॥

ब्रह्मसूत्रभाष्य Brahmasūtrabhāṣya

No. 555 No. $\frac{384}{1895-1902}$

Size.— 11 in. by 4⅜ in.

Extent.— 312 + 1 = 313 leaves ; 14 lines to a page ; 38 letters to a line.

Description.— Country paper; Devanāgarī characters; handwriting medium to large, bold, but not uniform. folios repeated 8-9, Borders ruled with double red or black lines. Yellow

pigment for deletion ; marginal additions and corrections. Beginning in red. Red chalk smeared over key-words. An incorrect transcript.

Age.— Saṁvat 1738.

Author.— Śaṁkarācārya.

Begins.— fol. 1[b].

श्रीगणेशाय नमः ॥ श्रीरामचंद्राय नमः ॥

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः प्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरिति etc.

Ends.— fol. 310[b].

सम्यग्दर्शनविध्वस्ततमस...सिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिसदाश्रयणेनैव हि सगुणपरायणानामप्यनावृत्ति सिद्धिरिति। अनावृत्तिः शब्दादित्यभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥ छ ॥ छ ॥

इति श्रीशारीरकमीमांसाभाष्ये शङ्करभगवत्पादकृतौ चतुर्थाध्यायस्य चतुर्थः पादः समाप्तोयम् ॥ छ ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥ स्तु जगत् ॥ हरिः ॥ छ ॥ ॐ ॥ ॐ ॥ संवत् १७३८ व ..... पूर्णमा गुरुदिने ॥ आनन्दवने अविमुक्तक्षेत्रमध्ये लिषितम् ॥

Then follows a verse.

ब्रह्मसूत्रभाष्य — Brahmasūtrabhāṣya

No. 556 — No. $\frac{601}{1886-92}$

Size.— 10½ in. by 4½ in.

Extent.— 323 leaves ; 13 lines to a page ; 34 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting medium, bold and uniform. Folios missing 1–16; folios nos. 165, 192, 249 repeated. No border ruling. White pigment used for deletion. Usually very clear writing, with very occasional marginal corrections. Several foll. are discoloured.

Age.— Appearance old.

Author.— Saṁkarācārya.

Begins.— fol. 17[a].

साद्राद्वियोगिनामप्यतीतानागतविषयं प्रत्यक्षं ज्ञानमीच्छंति योगशास्त्रविदः किमु वक्तव्यं तस्य नित्यसिद्धस्येश्वरस्य सृष्टिस्थिति संहृतिविषयं नित्यं ज्ञानं संभवतीति etc.

Ends.— fol. 336[b].

प्राचीनशाल औपमन्यव इत्यस्यामाख्यायिकायां-व्यस्तस्य समस्तस्य च वैश्वानरस्योपासनं श्रूयते। व्यस्तोपासनं तावदौपम

ब्रह्मसूत्रभाष्य सटीक (भाष्यरत्नप्रभा)

Brahmasūtrabhāṣya with Comm. (Bhāṣyaratnaprabhā)

No. 557

No. $\frac{671}{1883-84}$

Size.— 10½ in. by 3⅞ in.

Extent.— 76 leaves ; 14 lines to a page ; 45 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting medium, legible and uniform. folios missing 50. Border unruled. Marginal additions and corrections. Text and com. follow one another. Key-words smeared with red chalk. Several folios repaired and corrected in first hand. Ms. contains the first pāda of the first chapter only.

Age.— Appearance old.

Author.— c. Śaṁkarācārya.
cc. Govindānanda.

Begins.— fol. 2[b].

Text.—

(शांकरभाष्य)

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः प्रकाशवत्।
विरुद्धरचभावयोरितरेतरभावानुपपत्तौ सिद्धायाम्॥ १॥ etc.

Begins.— fol. 1[a].

Comm.—

श्रीनारायण।

यमिह कारुणिकं शरणं गतोप्यरिसहोदर आप महत्पदं।
तमहमाशु हरिं परमाश्रये जनकजां कमनंत सुखाकृतिं॥ १॥ etc.

Ends.— fol. 77[b].

Text.—

व्याधिधर्मेण ब्रह्मण उपासनमाश्रित्यमिहापि त न्युज्यते वाक्येस्योपक्रमोपसंहाराभ्यामेकार्थत्वावगमात्प्राणप्रज्ञा ब्रह्मलिंगावगमाच्च तस्माद्ब्रह्मवाक्यमेतदिति सिद्धम् ॥

इति श्रीमच्छारीरकमीमांसाभाष्ये शङ्करभगवत्पादकृतौ प्रथमाध्यायस्य प्रथम पादः ॥ छ ॥

Comm.—

उपक्रमादि नैकवाक्यतानिर्णयात् । तस्माज्ज्ञेय प्रत्यक् ब्रह्म परिमिदं वाक्यमित्युपसंहरति । तस्मादिति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीगोविन्दानन्दभगवत्पादकृतौ श्रीमच्छारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमस्याध्यायस्य प्रथमपादः समाप्तः ॥ १ ॥

References.—

(1) Mss.— A–Aufrecht's Catalogus Catalogorum :—
Bhāṣyaratnaprabhā I 386[a] ; II 87[b], 213[b] ; III 83[a].
of Govindānanda.
B–Descriptive Catalogues :—
Mad. Cat. IX, Nos. 4679–82 (pp. 3482–5).

(2) Printed Editions :—
Emeneau 2886.

ब्रह्मसूत्रभाष्य सटीक (टीका-रत्नप्रभा) — Brahmasūtrabhāṣya with Comm. (Ṭīkā-Ratnaprabhā)

No. 558 — No. $\frac{356}{1899–1915}$

Size.— 11½ in. by 5¼ in.

Extent.— 80 + 28 + 51 + 33 + 153 + 73 + 44 = 462 leaves; 11–13 lines to a page ; 45–55 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting medium, small, bold, uniform. Folios 1–51 of pāda 1 of Adhy. 3 are missing. There is separate pagination of the 4 pādas of Adhy. 1 only. Borders ruled with two spaced double black lines. Yellow pigment used for

deletion. Red chalk smeared on key-words. Text in centre, comm. above and below it. Fol. 1[a] and the last fol. contain two *citra-bandha* verses each, letters in black and enclosing design in red.

Pagination of the Ms. is as follows :—

Adhy.	Pāda I	Pāda II	Pāda III	Pāda IV	Total
I	80	28	51	33	192
II	...	...	...	...	153
III	...	...	...	...	73
IV	...	...	...	...	44

Age.— Fairly old.

Author.— Bhāṣya-Śaṁkarācārya.

Comm.— Govindānanda.

Begins.— Bhāṣya— fol. 3[a].

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः प्रकाशवत् etc.

Comm.— fol. 1[b].

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

यमिह कारुणिकं शरणं गतोप्यरिसहोदर आयमहत्पदां ।

तमहमाशु हरिं परमाश्रये जनकतां कमनंतसुखाकृतिम् ॥ etc.

Ends.— fol. 44[a] (of Adhy. 4)

Bhāṣya—

तदाश्रयणेनैव हि सगुणशरणानामप्यनावृत्ति सिद्धिरिति अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छंकरभगवत्पादकृतौ चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः ॥

Comm.—

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमद्गोपालसरस्वती-पूज्यपादशिष्य श्रीगोविन्दानन्द-भगवत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्य-रत्नप्रभायां चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः ॥

ब्रह्मसूत्रभाष्य सटीक (रत्नप्रभा)

Brahmasūtrabhāṣya with comm. (Ratnaprabhā)

No. 559

No. $\frac{51}{\text{Viśrāma I}}$

Size.— 14½ in. by 6¼ in.

Extent.— 192 leaves ; 11 lines to a page ; 53 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting medium, large, uniform, clear. Borders ruled with double red lines. Text in centre, com. above and below it. Writing often projects in margin. Red chalk on key-expressions.

Age.— Oldish.

Author.— Text.— Śaṁkarācārya.
Comm.— Govindānanda.

Begins.—

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

Text.— fol. 3[b].

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः ॥ etc.

Comm.— fol. 1[b].

यमिह कारुणिकं शरणं गतोप्यरिसहोदर आय महत्पदं etc.

Ends.— fol. 192[b].

Text.—

सांख्यैरित्युच्यते चेतनात्मविज्ञानाद्धि मृत्युमुखात्प्रमुच्यत इति तेषामभ्युपगमः सर्वेषु वेदांतेषु प्राज्ञस्यैवात्मनोऽशब्दादिधर्मत्व

Comm.—

साधारणशब्दमात्रान्न प्रधानस्य प्रत्यभिज्ञा स्मार्त्तलिंगस्यानुक्तयानियामकाभावादिति तात्पर्यमभिलप्यते तस्मान्न प्रधानस्यात्र ज्ञेयत्वमव्यक्तं शब्दनिर्दिष्टत्वं वा लिंगोक्तिमाशंक्य निषेधति वदंतीति चेदिति अत्र हि तादृशमेव निर्दिष्टमित्यन्वयः स्पष्टमन्यत्

ब्रह्मसूत्रभाष्यटीका
(रत्नप्रभा)

Brahmasūtrabhāṣyaṭīkā
(Ratnaprabhā)

No. 560

No. $\frac{602}{1886-92}$

Size.— 9¼ in. by 5⅜ in.

Extent.— 69 leaves ; 13 lines to a page ; 38 letters to a line.

Description.— Thin country paper ; Devanāgarī characters ; handwriting medium, bold, uniform. Folios wanting 1–74. Borders ruled with three black lines. Yellow pigment used for deletion; red chalk on key-passages. Occasional marginal corrections and additions. Ms. ends with the first chapter.

Age.— Saṁvat 1824.

Author.— Govindānanda.

Begins.— fol. 75[a].

द्ब्रह्म संपद्यते। स्योनंते सदनं करोमीति संस्कारार्थसदनस्य निराकांक्षस्यापि तस्मिन् सीदेति साकांक्षतच्छब्देन परामर्शदर्शनादित्याह शोच्यत इति। etc.

Ends.— fol. 143[a].

प्रत्यक्षायोग्यवस्तुपरत्वादणुशब्दस्य सूक्ष्माभिप्रायत्वादशब्दत्वं तेषां वादानां प्रधानवदशौचत्वं ब्रह्मकारणश्रुतिबाधितत्वं च तस्माद्ब्रह्मैव परमकारणं तस्मिन्नेव सर्वेषां वेदान्तानां समन्वय इति सिद्धम् ॥ ८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीगोविंदभगवत्पूज्यपादशिष्य-श्रीशंकरभगवत्पादकृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य चतुर्थः पादः समाप्तः प्रथमाध्यायः ॥ स ॥ श्री ॥ मायूः ॥ मासोत्तममासे असाढमासे शुक्लपक्षे तिथौ सोमवासरे ॥ संवत् १८२४ ॥ श्रीः रामजी ॥

ब्रह्मसूत्रभाष्यटीका
(रत्नप्रभा)

Brahmasūtrabhāṣyaṭīkā
(Ratnaprabhā)

No. 561

No. $\frac{628}{1884-87}$

Size.— 10⅛ in. by 4⅜ in.

Extent.— 24 leaves ; 12 lines to a page ; 38 letters to a line.

Description.— Rough country paper ; Devanāgarī characters ; handwriting medium, bold and uniform. Fol. no. 17

repeated. Borders ruled with four black lines. Red chalk smeared over key-words. Occasional marginal additions or corrections.

Age.— Old.

Author.— Govindānanda.

Begins.— fol. 1[b].

श्रीमते रामानुजाय नमः। श्रीगणाधिपतये नमः।
श्रीसीतापतये नमः। भगवंतं शरणं प्रपद्ये। प्रणवमहिदेव भगवत् मानुष्य रूपेण नमस्ते॥ ॥ ॐ ॥
यत् ज्ञानाज्जीवतो मुक्तिरुत्क्रांतिगतिवर्जिता।
लभ्यते तत्परं ब्रह्म राम नामास्मि निर्भयम्॥ १॥
आवृत्तिरसकृदपदेशात्। असाधनं निरूप्यफलं निरूप्यत इत्यध्याययोर्हेतु-फलभावं संगतिमाह ततीय इति। etc.

Ends.— fol. 23[b].

वक्षस्यक्ष्णोश्चपार्श्वेकरतलयुगुले कौसुमाभां दयां च
सीतां कोदंडदीक्ष्या यमथवरयुतां वीक्ष्य रामागसंगा।
स्वस्याः कूस्यादितीषं हृदि कृतमननाभाष्यरत्नप्रभा सा
स्वात्मानंदेकलब्ध्वा रघुवरचरणांभोजयुग्मं प्रपन्ना॥
इति श्रीमत्परमहं(स)परिव्राजकाचार्य-श्रीमद्गोपालसरस्वतीपूज्यपाद-शिष्य-श्रीगोविंदानंद-भगवत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्य-रत्नप्रभायां चतुर्थाध्यायस्य चतुर्थः पादः॥ ४॥
समाप्तं च शास्त्रे॥
भाष्यरत्नप्रभां श्रीमदुत्तमश्लोककिंकरः।
कृष्णानंदौ लिखत्कृष्णतुष्टयर्थे कृष्णनोदितः॥
कंसध्वंसाय वै पुसगोदृध्वनेकमानवे।
अप्रमेय प्रकाशाय नमः प्रत्यक्स्वद्रविंणे॥ २॥
रामराम etc.

ब्रह्मसूत्रटीकाभाष्य — Brahmasūtraṭīkābhāṣya

No. 562 — No. $\frac{779}{1891-95}$

Size.— 13⅛ in. by 4⅜ in.

Extent.— 18 leaves; 11 lines to a page; 47 letters to a line.

Description.— Dark country paper; Devanāgarī characters; handwriting medium large, clear, uniform. Folios missing

7–9, 11, 13–14. Borders ruled with double or triple black lines. All foll. are discoloured and several repaired. Yellow pigment used for deletion. Red chalk smears on *lemmata*.

Age.— Saṁvat 1753.

Author.— Govindānanda.

Begins.— fol. 1[b].

श्री । ॐ म् ॥

यत् ज्ञानाज्जीवतो मुक्तिरुत्क्रांतिगतिवर्जिता ।
लभ्यते तत्परं ब्रह्म रामनामास्मि निर्भयम् ॥ ॥
आवृत्तिरसकृदुपदेशात् । साधनं निरूप्य फलं निरूप्यत
इत्यध्याययोर्हेतुफलभावं संगतिमाह । ततीय इति । etc.

Ends.— fol. 24[b].

वक्षस्यक्ष्णोश्च पर्श्वे करतलयुगले कौस्तुभाभां दयां च
सीतां कोदंडदीक्षासभयवरयुतां वीक्ष्य रामांगसंगः ।
तस्याः क्व स्याद्द्वितीयं हृदि कृतमननाभाष्यरत्नप्रभाया
स्वात्मानंदैकलब्ध्वा रघुवरचरणांभोजयुग्मं प्रपन्नम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोपालसरस्वतीपूज्यपादशिष्य-श्रीगोविंदानंदभगवत्पादकृतौ शारीरकमीमांसाव्याख्यायांभाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ शुभमस्तु ॥ ॥ संवत् १७५३ भाद्रपद शुक्लपक्षे तिथौ तृतीया गुरुदिने ॥

ब्रह्मसूत्रभाष्यव्याख्या (रत्नप्रभा) — Brahmasūtrabhāṣyavyākhyā (Ratnaprabhā)

No. 563 — No. 659 / 1887–91

Size.— 12 in. by 4¼ in.

Extent.— 29 leaves; 13 lines to a page; 57 letters to a line.

Description.— Rough country paper; Devanāgarī characters; handwriting medium, bold, uniform. Folios missing 14–19. No border ruling. Red chalk on key-words, etc. Marginal additions. Most foll. discoloured. Scoring out in ink. The writing and paper appear identical with No. 564, and the date on the library slip is actually given as Saṁ. 1803, probably on this basis; incomplete.

Author.— Govindānanda.
Begins.—fol. 1[b].

ॐ तत्सत् ।

यं हि वैराग्यसंपन्नास्तत्त्वमर्थविवेकिनः ।
लभंते साधनैर्दांतास्तं सीतानाथकं भजे ॥ ॥

तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रष्णनिरूपणाभ्यां । वृत्तमनूद्य तृतीयाध्यायार्थमाह । etc.

fol. 7[a].

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमद्गोविंदानंदभगवतः कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां तृतीयाध्यायस्य प्रथमः पादः ॥ ॥

Ends.— fol. 35[b].

तथा ज्वलनतापादीन्यग्न्योदित्यादीनां व्रतानि भग्नान्वीत्युक्ता वायोरभग्नव्रतत्वं निर्धारितं । स यथैषा प्राणानां मध्यमः प्राणः स्थिरव्रत एवमेतासां देवतानां वायुर्लोचंति ह्यन्या देवता न वायुः

ब्रह्मसूत्रभाष्यव्याख्या
(रत्नप्रभा)

Brahmasūtrabhāṣyavyākhyā
(Ratnaprabhā)

No. 564

658
1887–91

Size.— 12⅛ in. by 4⅛ in.
Extent.— 24 leaves ; 13 lines to a page ; 57 letters to a line.
Description.— Dark country paper ; Devanāgarī characters ; handwriting medium small, bold, uniform. Folios missing 1, 4–14, 21–35 ; no border ruling. First two foll. badly damaged near left and right margins respectively. Red chalk smeard on key-words and lemmata on a few foll. Most foll. sticking to each other, but easily separable. Occasional marginal additions or corrections.
Age.— Saṁvat 1803.
Author.—Govindānanda.
Begins.— fol. 2[a].

दध्यादिरूपा आपो यजमानसंलग्नाः स्वर्गलोकं प्राप्य सोमाख्यदिव्यदेहात्मना स्थिताः कर्मांते द्रुताः पर्जन्ये हूयंते ततो वृष्टिरूपाः पृथिव्यामन्नरूपाः etc.

Ends.— fol. 51[b].

किं च कर्मणामुपासनानां च गुणभेदेन तारतम्यात्फलतारतम्यं युक्तं निर्गुणविद्यास्वेकरूपत्वात्तत्फलैकरूप्यमित्याह विद्याभेदेत्यादिना। स्मृतौ कस्यचिन्निर्गुणविदित्यर्थः। तस्माद्विद्या समकालैव मुक्तिरिति सिद्धम्॥

इति श्रीमत्परमहंस-परिव्राजकाचार्य-श्रीगोविंदानंद भगवत्कृतौ शारीरक-व्याख्यायां भाष्यरत्नप्रभायां तृतीयाध्यायस्य चतुर्थः पादः॥ अध्यायः समाप्तः॥ ३॥ श्रीः ५ शुभमस्तु सं. १८०३ कार्तिककृष्णाष्टम्यां गौरीदत्ता-ख्येनालेखि॥ शुभमस्तु॥ ब्रह्मणे नमः॥

ब्रह्मसूत्रभाष्यटीका (भामती) — Brahmasūtrabhāṣyaṭīkā (Bhāmatī)

No. 565 — 625 / 1884–87

Size.— 10⅜ in. by 4⅜ in.

Extent.— 172 leaves ; 13 lines to a page ; 34 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting medium, bold and uniform. Fol. 89[a] blank. Borders ruled with double black lines. Yellow pigment used for deletion. Marginal additions and corrections. Red chalk all over folios on important words. Covers only part of the first chapter.

Age.— Appearance old.

Author.— Vācaspatimiśra.

Begins.— fol. 1[b].

ण॰॥ नमो गणेशाय॥

अनिर्वाच्या विद्या द्वितय सविवस्व प्रभवतो
विवर्त्ता यस्यैते वियदनिलतजोबवनयः।
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्म परिमितसुखज्ञानममृतम्॥ १॥ etc.

Fol. 90[a].

इति श्रीवाचस्पतिमिश्रविरचिते भाष्यविभागे
भामत्यां प्रथमाध्यायस्य प्रथमः पादः समाप्तः॥

Ends.— fol. 172[b].

स च निमित्तकारणं चोपादानकारणं चैश्वरमवगमयतीति विशेष्याश्रय-ग्राह्यागमविरोधात् नानुमानमुदेतुमर्हतीति कुतस्तैननिमित्तत्वावधारणे-त्यर्थः। इयं चोपादानपरि ...

On the fly-leaf we have the following endorsement.

1[a] वाचस्पत्यपुस्तकं परंडेकर पंडितरायस्य ।
व्यासमया रामेण गृहीतं मुद्रा एकादशकं दत्वा मौल्येन ॥

References.—

(1) Mss.— A-Aufrecht's Catalogus Catalogorum :—
भामती by Vācaspatimiśra.
I 405[b]; II 92[b], 215[a]; III 88[a].
B-Descriptive Catalogues :—
Ind. Off. Cat. Nos. 2233–52, 5922–4.

(2) Printed Editions :—
Emeneau 2886.

ब्रह्मसूत्रभाष्यटीका
(भामती)

Brahmasūtrabhāṣyaṭīkā
(Bhāmatī)

No. 566

No. $\frac{626}{1884-87}$

Size.— 9⅞ in. by 4½ in.

Extent.— 13 leaves ; 10 lines to a page ; 50 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting small, clear and uniform. First few leaves have ruled borders. Yellow pigment for deletion. Red chalk on key-passages. Incomplete. Fol. 1[a] : in a different hand and ink : शंकराचारनुं टीपण in Gujarati characters.

Author.— Vācaspatimiśra.

Begins.— fol. 1[b].

श्रीगोपीजनवल्लभाय नमः ॥

